1044

॥अथरामवाजपेयऋत्विजमंडपः॥

॥पत्र१७॥

LIBRARY
ROYAL ASIATIC SOCIETY
BOMBAY BRANCH

॥श्रीगणेशायनमः॥इष्टापूर्तेषंगमाद्येयदाहुर्यस्यानत्वाधिक्यतोपरिदोषाः॥कुंडं
सांगंपरिभेदंतदत्रब्रूतेरामोनैमिषस्थोविचार्य॥१॥त्रसरेणुरथरेणुर्वालाग्रंतदनु
लिक्षाच॥यूकायवोंगुलमितिपरमाणोःक्रमतोष्टगुणितानि॥२॥चूतमुष्टिकःप्रको
ष्टोमुष्टीरत्निर्निरष्टमांशकरः॥सोरत्निस्त्वकनिष्ठःकरएवकलांशरहितःस्यात्॥३॥
हस्तस्कत्रतुर्विंशत्यंगुलउदितोमितोपटुभिः॥अंगुष्ठमध्यरेषामध्यांगुलिमध्यपर्व
मितं॥४॥अंगुलमाहुर्बहुधासिद्धांतंब्रूमहेतत्र॥उपलब्धःश्रुतिमूलंकल्पद्रुदितं
समाश्रित्य॥५॥समस्थितेवाप्रपदोच्छ्रितेवायदूर्ध्वबाहोर्नरिपंचमांशः॥हस्तःसत

स्यापिजिनांशकोत्रांगुलंयवस्तस्यलवोष्टमस्तु॥६॥यजमानांगुलकरमितिसर्वत्रबो
द्व्या॥परिभाषितंप्रमाणंयजमानस्येवकल्पयेत्॥७॥कीलेनैकीकृतेमूलेपृथक्सूक्ष्म
समाग्रयोः॥दंडयोरग्रनिकृष्टोन्यस्तिर्यञ्चध्यचिह्नतः॥८॥कीलादिनायोजनीयोदंडःस
मतयाद्वयोः॥मूलप्रोतंलंबसूत्रमस्याङ्कारवद्भुवं॥९॥भस्थेग्रयुग्मेमध्यांकान्तिर्यग्दं
डगताघतः॥स्खलेत्तत्सूरयेदन्यन्निःस्वनेद्वापियुक्तितः॥१०॥अंकेयावत्सूत्रमेतिभूरि
श्वंसमतांव्रजेत्॥विशोधितायांप्राक्तस्यांमंडपादिसमाचरेत्॥११॥सूच्यग्रःसरलःशं
कुःपृथुर्मूलेधृतःस्थिरः॥अधोपिवासूक्ष्ममुखोनिहितःप्रविशेद्भुवि॥१२॥पादोन

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

शंकुतुंगलव्यासार्धकृतमंडले॥मध्येनिवेश्योवृत्तस्यदिक्चतुष्टयतःसमैः॥१३॥सपा
दशंकुतुंगलमानेरेकीकृताग्रकैः॥चतुःकीलैःसृष्टशिराएवंशंकुर्भुजेवृत्॥१४॥
शंकुमानाधिकव्यासदलेवृत्तेविशोधतः॥निर्यातिचयतःशंकुछायाप्राक्सूत्रमेतयोः॥१५॥
द्युनिप्रवेशापगमांतरालघटीहृतंश्वोपगमांतरालं॥प्रकृत्तभागंखरसच्छिदाप्ता
शेनायनांशाञ्चलितेंदुकाष्टा॥१६॥प्राच्यंताभ्यांमध्यमुल्लंघ्यकिंचिच्छिष्टवृत्तार्धेछते
यौतिमीस्तः॥ताभ्यांयाम्योदगंताभ्यांतुरेखांमध्येदद्याद्दक्षिणोदक्प्रसिध्ये॥१७॥
सूत्रेप्राचिविलंघ्यमध्यमुभयांताभ्यांतिमीपार्श्वयोःकृत्वोदगंतसूत्रमत्रविलिखे 2

स्राचीगुणेनोन्मितं॥दिक्चिद्वयतोविदिक्षुचक्षणाव्यासार्धमिष्टालिखेत्सूत्रैस्तेषु
चतुर्षुवेदमितिभिःस्याद्वृत्तकोणंसमं॥१८॥व्यासद्विगुणरज्जंतपाशैःकृत्वांकयेद्दि
शां॥व्यासार्धमानेशंकुकर्थंसार्धेस्मिन्कर्षणायच॥१९॥प्राच्यंतशंकोस्तत्पाशैःकृ
त्वाकृष्यकर्षणे॥शंकुकेवाकृश्रोणिरेवमुदग्व्यस्यचांसकौ॥२०॥दत्त१०रवि१२
कराघातावल्योमतावथमध्यमोरवि१२मनु१४कराघातोश्रेष्ठोकला१६धृति१८पा
णिकौ॥वितस्तिरपिचप्रोक्तायामोन्मितेवहिर्मंडपेनरव२०करमपिप्राहुःकेचित्तुला
पुरुषार्पणे॥२१॥द्विकरायतिकंदिगंतराभवतिद्वारचतुष्टयंक्रमात्॥चतुरष्टमितं

गुलैधनंकथितंमध्यमपद्म्ययोरपि॥२७॥त्रिधामध्यसूत्रंविभज्याथमध्यत्रिभागेत्र
वेदीष्टकाभिर्विधेया॥समावेदकोटिस्तदुछ्रायइष्टस्त्रिखेदेषुपक्षसप्तग्रहेश्वांशा
केर्वा॥२७॥सारद्रुजास्तदनुमंडपवेदिकोणेषूच्छ्रपंचकरतःसुदृढर्जुतुल्या॥द्वा
राणिचाभितउभावुभयंनिरवेयास्तंभाःस्वपंचमलवैर्भुविषोडशेति॥२८॥वेदिकोणो
षुयेस्तंभाश्चत्वारोमध्यमास्थिताः॥श्रेष्ठमंडपविस्तारदलोच्चास्तेमताःशुभाः॥२९॥
मध्यमाधमयोरष्टहस्तास्तंत्रांतरोक्तितः॥वलिकास्तेषुविन्यस्यमध्यभागोछ्रितिं
सृजेत्॥३६॥वेदिस्तंभचतुष्टयंचूडासुसंध्रदारुणि॥तिर्यक्समानिदध्याछाद्यः ३

रेवे

परितोपिमंडपोथकटैः॥३७॥अश्वत्थोदुंबरजटिवटैःपंचषट्सप्तहस्तोछ्रायाःकृ
ष्णायुगलयुगलंद्वार्बुशारवानिधेयाः॥तिर्यग्घस्तद्वितयफलकंहस्तपादार्धदृढंन्य
स्येच्छूडास्वपिनिडबिलैरल्पमध्योन्नमेषु॥३८॥वेदांशगुलैःसार्धयुगेश॥श्ववाणेप
स्तन्मूर्धिकीलाविनि वेशनीयाः॥तेवैष्णवेकंध्रुवियद्गजवत्युस्तथाशूलनिभा
स्त्रयोवे॥३९॥दैर्घ्येनवंगुलमितंस्वतुरीयभागाद्विस्तारिशूलमृजुमध्यशृंगमुक्तं॥
वक्त्रेतरद्वयमुभेबिलमंगुलेनमध्यस्थितंविशतिहीनकमंडपस्येत्॥४०॥द्विद्व्यंगु
लंखपरयोरिदमुन्नतंवर्धतेवेशनमथांगुलमेकमेकं॥शारवाश्वतोरणाभवा

निजपंचमांशैरवंक्षितावबटकल्पनयाविशंति॥३१॥पंचाशास्त्रमितेशनाद्दशगुणो
प्याकोटिहोमेक्रमात्कुंडंरक्तिररक्तिहस्तविततंद्यरब्ध्यंशगद्दनागैः करैः॥आद्दुर्लक्ष
हुतोचहस्तमितमप्येकैकहस्तै धनंयावत्संकिचलक्षवृद्धितइदंकोटीतुपंचन्यकरैः॥
॥३२॥समंततश्चतुर्हस्तंप्रोक्तंषोडशहस्तकं॥स्कंदकोटिहुतेप्रोक्तंकुंडंतत्स्थूलवस्त्र
नि॥३३॥चतुरस्रेखिलसिद्धिर्यानोपुत्राःशुभंदलेंद्वाभे॥त्र्यस्रिण्यनरिचक्रेशां
तिःषट्कोणकेमतिछेदो॥३४॥पद्मेरष्टिररोगोष्टकोणकेकुंडयुग्ममन्यच्च॥अभि
चारशमेभूतोत्सादेहयपंचकोणमुदिष्टं॥३५॥चतुरस्ररत्नचंद्रार्धाभत्र्यस्त्रीणि ४

चक्रमेणैवमुख्यानि॥विप्रराजविडंत्येषुविलेषुवाब्ध्यस्रिवर्तनेसंज्ञा॥३६॥
स्तंभभोगमितिवैरिणांतिकोच्चाटपुष्टिपरनिर्दलिषुपि॥शाक्रदिक्प्रभृतिदिक्षुवे
दितोथाष्टकुंड्यपिपदांतरेभवेत्॥३७॥अष्टोनद्विशतांशसूत्रकचतुष्कोणेपुरस्ना
द्दत्वाष्टत्रिंशतमेधयत्वथलवांछोणेयोरिमानर्धशः॥अग्रात्सूत्रयुगेत्रिकोणरि
तिंतछोणेयास्ततोर्धभ्रमाद्दजार्धंबहिरालिखेदितिभवेत्कुंडोत्तमंयोनिवत्॥३८॥
चतुष्कोणक्षेत्रेजिनलवकमध्यस्थितगुणंविहायाधःसार्धद्वयमुपरितावच्चम
तिमान्॥कलांशेनांशस्योनिततमुपरितिर्यक्कुरुगुणंभ्रमार्धंनिम्नादपिशा

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC

त्रिदलंकुंडमितितु॥३९॥क्षेत्रस्यमध्यमगुणेजिनभागभक्तेश्रोण्योःपृथक्शार५
लवान्यरिवर्ध्यधीमान्॥अग्रेविनाष्टमलवेनदशाथसूत्रैस्त्र्यस्त्रिस्त्रिभिर्भवतिकुं
डमिहप्रयुक्तैः॥४०॥षोडशाधारुनमध्यमसूत्रैक्षेत्रंपुरःपरिवर्धितभागैः॥एकैक
एवततोंतरचिह्नान्मंडलकुंडमितिभ्रमणात्स्यात्॥४१॥अष्टोनद्विशतांशकेंतर
गुणेक्षेत्रस्यतिर्यस्थितांतत्सूत्रोभयतोभवर्धनलवांकोर्ध्वाधरेचिह्नयेत्॥ततो५
शेषुभयेःपुरोयधरतोंकद्यं२९शद्वेद्वेषट्द्वाद्विगुणेर्द्विपार्श्वगुणतस्ति
र्य्याःषडस्त्रीरितं॥४२॥क्षेत्रेतश्चतुरस्रकेवितिवस्वंशोनलब्धंकृतंयासार्धंनतु ५

कर्णिकापुनरियद्ध्यात्पत्रमालेसराः॥तद्ध्यादलमध्यभूःपुनरियद्ध्यात्
भ्रमे णोर्ध्वभूःक्षेत्रव्यासजिनांश कस्यविशिरेरुनंकलांशोःपुनः॥४३॥त
त्संवर्ध्यदलाग्रकर्णिरचयेत्क्षेत्रार्धमुक्तन्विनास्याश्रिंशालुवविस्तृतीस्थमिय
ताद्विघ्ननृनंबहिः॥स्वव्यासप्रमितोच्चतामिहखनेत्यक्तांतराकर्णिकांकुर्वन्केस
रचिह्नमष्टदलकंयद्वाचतुर्भिर्दलैः॥४४॥क्षेत्रव्यासजिनांश४शकेषुचतुरःसंव
र्ध्यसांकंसुरांशो३२रकस्यगुणेंदु१३भिर्बहिरमुष्येतद्धितत्यावहेत्॥वेदास्त्र्यन्यदु
दारदिग्गुणयुतंदिक्कोणमध्येकृताशंकेघष्टगुणेस्तृतीयमिलितेरष्टास्त्रिकुंड

भवेत्॥४५॥दिक्सूत्रयुग्ममथयच्चतुरस्रयुग्ममाद्यंतदत्रपरिमार्ज्यमशेषमेव॥
संपाततोंतरगतंचतथाष्टसूत्र्यांरेखाष्टकंत्वपनयेदितिकुंडरूपं॥४६॥प्रागादि
कुंडत्रयमुत्तराग्र्यांम्यस्थयोनीतरपंचकुंडी॥प्रागग्रिकापश्चिमयोनिरत्रप्राकुंड
वत्स्यान्नवपंचकुंडं॥४७॥क्षेत्रव्यासदलेर्कैर्भागजुषिसंवर्ध्यांशकांस्त्रीन्महो
क्षानांविंशलवेनमंडलमितिव्यासार्धतःसाधयेत्॥पं चांशाद्वितयोननिघ्नमि
मिताज्याःपंचतत्रावहेज्याःषष्टांशघ्नराणिपंचगमयेद्वन्वनिपंचाग्निनत्॥४८॥
क्षेत्रव्यासदलेंगरामलवजुष्यंशावर्ध्यावितत्यर्धनघ्नमयेदनेनवलयं

नद्व्यासविंशोलवः॥येषुस्याद्विशिरोनवाहतग्नरेणेवज्ययाताद्दृशश्चापान्सघ्नमि
थोमिलद्गुणमुरवान्सप्तास्त्रिणिघ्नावहेत्॥४९॥क्षेत्रेयत्रचतुरस्रकेंतरगतंविस्तार
सूत्रंरूतिघ्नस्यक्षेत्रफलंभवेद्विगुणितादिःसाद्विनिघ्नादिके॥क्षेत्रस्यात्फलमेतदी
यपदमप्यायामसूत्रंभवेन्नस्मिन्क्षेत्रइतःसजेत्कथितवत्कुंडंचतुःकोटिकं॥५०॥इ
ष्टस्येकोनस्यविस्तारसूत्रंपार्श्वेतिर्यक्कैकविस्तारसूत्रं॥मत्स्यद्वंद्वेनोक्तयुक्त्यानिवे
श्यंतत्कर्णैःस्यादायतिक्षेत्रइष्टे॥५१॥विस्तारांगुलमानमेककरतोयावद्दृशस्या
जिनो२४वेद त्रीणि३४ कुसागराः४१शर५यवोपताभुजंगांबुधिः४८॥निष्पादा

बुधिसायका५४वियमंके५९र्धयुग्ग्रामय६३णागांगा६७न्ययवानिदृग्रुनि७२
यवेनोनाश्चषट्पर्वताः॥७६॥ ॥५२॥क्षेत्रेसखातंतुपलंयथास्याद्विघ्नादिखातेन्
तएवमूचुः॥द्विघ्नादिकक्षेत्रविनिर्मितंयेस्तेरंगभूतंखननंनबुद्धे॥५३॥किंमेखला
कंठयुजोपिनेतिक्षेत्रस्यवृद्धिर्हिगुणादिकेष्टा॥खातंयथेछंखलुमेखलापिकंठो
पिकुंडागमवादिदृष्टैः॥५४॥पुमुच्चयेसप्तविधातुमुख्यंक्षेत्रंश्रुतावेकमतप्रका
रात्॥श्रुल्बेप्यवादीतरथेष्टकानांसाकंचयैर्वर्धनमीरितंस्यात्॥५५॥वेदिर्वेदेन
योक्तादशादशचपदानीतिवीक्ष्योत्तरातंयेनोच्चेकल्पकारोदशाचरणफलांतेन ७

यल्लक्षहोमे॥कुंडंवेदद्विहस्तायततमधिभूपालपङ्त्यवादिव्यारब्धेयेवेदहस्तेसमु
निगिरिमतेभातिभूपान्नमादः॥५६॥सिद्धावेदगुणाःशशांकजलधीबाणेर्धजा
भोधयस्तर्कैःपक्षशरैःस्वरैर्गजशरैरोवेदैस्त्रितर्कैतथा॥अश्वैरश्वकृतांतकानिमु
नयोप्यश्वैश्चबाणस्वरौकुंडेषेककरक्रमेणगदितंमानेयवेरंगुलैः॥५७॥स्थापनेस
र्वकुंडानांध्वजायुःसर्वसिद्धिदः॥इत्येकहस्तस्तुतिगार्व्यर्थंहीतरमन्यथा॥५८॥वि
स्तारतुल्यंसमयाघमेखलोनत्रिबुधैःखातमवादिभूरिभिः॥योन्यादिनीष्टाचतुर
स्रविस्मृतिःक्वचित्तुतन्मेखलयाविनोदितं॥५९॥क्षेत्रव्यासस्यचतुर्विंशोनांशोन

कुंडबाह्यगलः॥भवतिसमंतात्समतःकेश्चिद्व्यासस्यसूर्यांशात्॥६७॥व्यासेचतुर्वि
ंशतिधाविभाजितेतिस्रश्चतस्रोक्षणभागविस्तृताः॥समंततःकुंडबहिश्चमेख
लानवर्तुलामांशकतुंगतामताः॥६८॥विस्तारतुल्योन्नतयस्तुकेश्चिदुक्ताइमाःकेन
चिदर्कभागैः॥आद्याच्चतोक्तापरयोस्तुनागवेदांशमानाभिदधेक्रमेण॥६९॥ष
ट्पंचवेदगुणपक्षलवैस्तुपंचस्युर्मेखलाइतरएषचपक्षइष्टः॥तुंगादिमांकुल
वतस्तदिषूपलवोनतुंगाःपराश्चथचविस्तृतिसंमितोच्चाः॥७०॥पडंशविस्तृतोन्न
ताथवैकिकेवमेखला॥भगादिकुंडकेष्विमाभजंतितादृगाकृतीः॥७४॥कुंडव्यास ८

दलायताथवितताश्चंशोनतुंगाश्चतुर्विंशांशोनचतावतापरिधिनायोनिःसमंता
द्भुता॥तावन्मानानिजाग्रकेणविशतीकुंडांतरेंतर्बिलासाधोवृत्तदलद्वयेनरुचिरा
नाश्चत्यपत्राकृतिः॥७५॥मघवन्शिखिरुतांतदि क्स्थकुंडेष्वियमधिमेखले
वमध्यभागे॥यमदिग्शिखिरात्रिदिग्भुवोनिवेश्यावरणादितरकुंडएंद्रवक्त्राः॥७६॥
योनेर्मूलेनालमुदीरितलान्तुप्रोक्तंकेश्चिल्लग्नमंतःसरंध्रं॥योनौकुंडेनैवयोनिस्तथे
ष्टानाभिःकेश्चित्कुंडमध्येपरोक्ताः॥७७॥नाभिःपद्माभाविशेत्कुंडमध्येतन्नकुं
डाकारकृत्स्यात्तमावा॥कुंडार्कांशास्तुंगताथद्विनिघ्नःसव्यासोस्याधीमताकल्प

नीयः॥६८॥पंचकुंडीवेन्निवेश्यादिक्षुतश्चेन्नापूर्वयोः॥एकंकुंडंचे त्प्रतीच्यंविधान
ग्रंथांतरात्परं॥६९॥सुस्थंकृत्वारतिविरतितः कंठनाभीवरांगंनानाशंकावकरनि
करानस्यताभ्रूरिभेदं॥यत्कुंडाख्यंहुतभुद्गुदरंभुद्भमाधायिबुध्याश्रीमांस्तेनानल
वपुरजः प्रीयतांयज्ञभोक्ता॥७०॥कश्चिन्नवेत्तिगणितंयदिचेदभुद्दंभुद्दंनवेदय
दिवेत्यपरोंकक्लृप्तिं॥विद्वान्द्वयंनविविधागमपंडितोन्यस्तज्ज्ञानवानपिसुपर्णाचि
तोपटूकः॥७१॥न्यायेननत्वमवधार्यमयायमन्यैरस्फोटितः प्रकटतामुपलंभिता
र्थः॥तुष्यंतुतेनसुधियःकुमतिस्त्वयोग्यः किंकामिनीरनकथाधिरुतोस्तिवर्ण॥७२॥

श्रीमद्रत्नपुराधिपेनमहितःश्रीरामचंद्रेणयोभारद्वाजकुलंबुधेर्विधुरिवश्रीमज्जटा
महिजः॥बंधूनांपरिणीतयेभ्युपगतोसौमालवोनैमिषंतेनगर्वेदविदेरितेनरचिता
रामेणकुंडाहितिः॥७३॥रसगगनतिथिप्रमाणवर्षेगतनवतिविक्रमभूमिपस्यका
लात्॥क्रतुविधिफलदायकेमरवेज्येवृतिरियमस्तुमयार्पितासुरेज्ञे॥७४॥ ॥इति
श्रीरामचंद्रविरचितंकुंडमंडपलक्षणंसमाप्तं॥ ॥संवत१८३९प्रमादीनामसंवत्सरे
तथाशके१७०४शुभकृन्नामाब्देज्येष्ठशुद्ध१० दशम्यांश्रीमहाकालराजधान्यांथा
ल्युपनामकनागेशभट्टात्मजशेषभट्टेनलिखितं॥श्रीरुद्रार्पणमस्तु॥ ॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिरामवाजपेयीकुंडलक्षणं॥पत्र१७॥